CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 539

Title Kāśikā vritti

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 539. Subject: Grammar

Title: Kāśikā vritti

Author: Vāmana. Scribe: —

Date of the work: — Date of the Ms.: V.S. 3988

Place of the work: — Place of the Ms.: —

Size: 9.8" by 4.2" Extent: 136 to 160 foll

Language: Sanskrit. Script: Devanāgarī

Remarks: —

अ॰ १ पा॰ १
१३६

॥नमः पतंजलये॥ ॥प्रत्ययः॥ अधिकारोयं। प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते। आपंचमाध्याय
परिसमाप्तेः। यानितऊर्द्धमनुक्रमिष्यामः। प्रत्ययसंज्ञास्ते वेदितव्याः। प्रकृत्युपपदोपाधिविकार
गमास्तुवर्ज्जयित्वा वक्ष्यति। तव्यत्तव्यानीयरः। कर्त्तव्यं करणीयं। तैत्तिरीयं। प्रत्ययप्रदेशाः। प्रत्ययलोपे प्र
त्ययलक्षणमित्येवमादयः। परश्च॥ अयमप्यधिकारो योगेयोगे उपतिष्ठते। परिभाषा वा। परश्च भवति
धातोर्वा प्रातिपदिकाद्वा। यः प्रत्ययसंज्ञः। कर्त्तव्यं। तैत्तिरीयं। चकारः पुनरस्यैव समुच्चयार्थः। तेन। उणा
दिषु परत्वं न विकल्प्यते। आद्युदात्तश्च॥ अयमप्यधिकारः। परिभाषा वा। आद्युदात्तश्च स भवति। प
प्रत्ययसंज्ञः। अनिपतप्रत्ययस्वरप्रसंगे तिका द्वच प्रत्ययेनुदात्तस्यानियमे सति वचनमादेरुदा
त्तार्थं। कर्त्तव्यं। तैत्तिरीयं। अनुदात्तौ सुप्पितौ॥ सर्वस्यायमपवादः। सुपः पितश्च प्रत्यया अनुदात्ता भ
वंति। दृषदौ। दृषदः। पितः खल्वपि। पचति। पठति। नयति। गुप्तिज्किद्भ्यः सन्॥ गुप गोपने कुत्सने
च। तिज निशाने क्षमायां च। कित निवासे रोगापनयने च। एतेभ्यो धातुभ्यः सन्प्रत्ययो भवति। प्रत्य
यसंज्ञा वाधिकृतैव। जुगुप्सते। तितिक्षते। चिकित्सति। निंदाक्षमाव्याधिप्रतीकारेषु सन्निष्यते। अ ३

न्यत्र। यथाप्राप्तं प्रत्यया भवंति। गोपयति। तेजयति। संकेतयति। गुपादिष्वनुबंधकरणमात्मनेपदार्थं
मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य॥ मान पूजायां। बध बंधने। दान अवखंडने। शान तेजने। एते
भ्यो धातुभ्यः सन्प्रत्ययो भवति। अभ्यासस्य चेकारस्य दीर्घादेशो भवति। मीमांसते। बीभत्सते। दीदां
सति। शीशांसति। उत्तरसूत्रे चाग्रहणं। सर्वस्य शेषो विज्ञायते। तेन कश्चिन्न भवत्यपि। मानयति। बा
धयति। अवदानयति। निशानयति। अत्रापि सन्नर्थविशेष इष्यते। मानेर्जिज्ञासायां। बधेर्वैरूप्ये
दाने रार्जवे। शानेर्निशाने। धातोः कर्मणः समानकर्तृकादिच्छायां वा॥ इषिकर्मणो धातोः
इषिणैव समानकर्तृकात्सन्प्रत्ययो भवति इच्छायामर्थे वा सन्प्रत्ययो भवति। कर्मत्वं समानकर्तृकत्वं च धा
तोरर्थद्वारकं। कर्तुमिच्छति। चिकीर्षति। धातुग्रहणं किं। सोपसर्गादुत्पत्तिर्माभूत्। प्रकर्तु
मिच्छति। प्रचिकीर्षति। कर्मण इति किं। करणान्मा भूत्। गमनेनेच्छति। समानकर्तृकादिति किं॥
देवदत्तस्य भोजनमिच्छति यज्ञदत्तः। इच्छायामिति किं। कर्तुं जानाति। वावचनाद्वाक्यमपि भव
ति। धातोरिति विधानात्तत्र सन आर्द्धधातुकसंज्ञा। न भवति। आशंकायामुपसंख्यानं। शंके।
पिपतिषति कूलं। श्वा मुमूर्षति। इच्छासनंतात्प्रतिषेधो वक्तव्यः॥ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ

अ॰ १ पा॰ १

र्धे पाद १

१३१

॥श्रीगुरुभ्योनमः॥ ॥क्यचः॥ विकार्षिपुत्रमिछति। विकोषएं। किम्। जुगुप्सिषते। मा। मांसीयति।
चे। षिकान्मतुवर्षीया। छे। षिको मतुवर्षीकः। सरूपप्रत्ययोनेष्टः। सन्नंतान्नसनिष्यते॥१॥
सुप आत्मनः क्यच्॥ ८ ॥ कर्मण इछायां चेत्यनुवर्त्तते। इषिकर्मण एषितुरेवात्मसंबंधिनः
सुबंतादिछायामर्थेवाक्यच्प्रत्ययो भवति। आत्मनः पुत्रमिछति। पुत्रीयति। सुबग्रहणं
किं। वाक्यान्मा भूत्। महांतं पुत्रमिछति। आत्मन इति किम्। राज्ञः पुत्रमिछति। ककारो नः
क्य इति सामान्यग्रहणार्थः। चकारस्तद्विघातार्थः। क्यचिमांतोऽव्ययप्रतिषेधो वक्तव्यः। इद
मिछति। किमिछति। उच्चैरिछति। नीचैरिछति। छंदसि परेछायामिति वक्तव्यम्। मात्वा वृक
अघायवो विदन्। काम्यच्च॥ सुबन्तात्कर्मण आत्मेछायां काम्यच्प्रत्ययो भवति। आत्म
नः पुत्रमिछति। पुत्रकाम्यति। वस्त्रकाम्यति। योगविभाग उत्तरत्रैकस्य वानुवृत्त्यर्थः। कका
रस्येत्संज्ञाप्रयोजनाभावान्न भवति। चकारादित्वाद्वा काम्यतः॥ उपमानादाचारे॥१०॥ १

क्यजनुवर्त्तते। नकाम्यच्। उपमानात्कर्मणः सुबन्तादाचारेऽर्थेवाक्यच्प्रत्ययोभवति। आ
चारक्रियायाः प्रत्ययार्थत्वात्। तदपेक्षयैवोपमानस्य कर्मता। पुत्रमिवाचरति। पुत्रीयति छात्रं
प्रावारीयति कंबलं। अधिकरणाच्चेति वक्तव्यं। प्रासादीयति कुट्यां। पर्यंकीयति मंचके। कर्त्तुः
क्यङ् सलोपश्च॥ आचार इति वर्त्तते। उपमानात्कर्त्तुः सुबंतादाचारेऽर्थे वा क्यङ्प्रत्ययो भवति
सकारस्य च लोपो भवति। अन्त्यावयवविशिष्टः सलोपः। तदभावेपि क्यङ् भवत्येव। श्येन इवाचरति
काकः श्येनायते। कुमुदं पुष्करायते। सलोपविधावपि वाग्रहणं संबध्यते। व्यवस्थितविभाषा च
भवति। ओजायते। अप्सरायते। पयायते। पयस्यते। ओजसोऽप्सरसो नित्यं पयसस्तु विभा
षया। क्यङो लोपश्च विज्ञेयो बाधिकारात्सलोपतः॥११॥ ॥सलोपविधौ च कर्त्तुरिति
न षष्ठी संबध्यते। तत्रालोन्त्यस्य नियमे सति। हंसायते सारसायते। इति सलोपो न भवति
आचारे गल्भक्लीबहोडेभ्यः क्विब्वा॥ ॥अवगल्भते। अवगल्भायते। क्लीबते। क्लीबाय

...३१५८

ते। विहोडते। विहोडायते। सर्वप्रातिपदिकेभ्य इत्येके। अश्व इवाचरति। अश्वायते। गर्दभीयते। अ
श्वति। गर्दभति॥ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः॥१२॥ भृशादिभ्यः प्रातिपदिकेभ्यो ऽ
च्व्यन्तेभ्यो भुवि भवत्यर्थे क्यङ् प्रत्ययो भवति। हलन्तानां च लोपो भवति। अच्वेरिति प्रत्येकमभिसंब
ध्यते। किमर्थं पुनरिदमुच्यते। यावता भवतियोगे च्विर्विधीयते। तेनोक्तार्थत्वात् च्व्यन्तेभ्यः क्यङ् न
भवति। तस्मादत्र प्रतिपत्त्यर्थं तत्र हि च्विप्रतिषेधः क्रियते। अभूततद्भावविषयेभ्यो भृशादिभ्यः प्रत्ययः। अ
भृशो भृशो भवति। भृशायते। शीघ्रायते। भृश। शीघ्र। चपल। मंद। पंडित। उत्सुक। उन्मनस्। अभिमनस्।
सुमनस्। दुर्मनस्। रहस्। रिहस्। रेफत। रोहित। शश्वत। इषत। श्वचि। वर्चस। ओजस। अरजस॥
अच्वेरिति किम्। भृशीभवति॥ ॥लोहितादिडाज्भ्यः क्यष्॥१३॥ लोहितादिभ्यो डाजन्तेभ्यश्च भव
त्यर्थे क्यष् प्रत्ययो भवति। लोहितायति। लोहितायते। डाजन्तेभ्यः। पटपटायति। घटघटायते। लोहि
तडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि। इतराणि यानि पठ्यन्ते तेभ्यः काङेव। अपरिपठितेभ्यस्तु ३

क्यषेव भवति। वर्म्मायति। वर्म्मायते। निद्रायति। निद्रायते। करुणायति। करुणायते। कृपायति। कृपायते
अत्र लिंगणो यं। तथा च ककारः सामान्यग्रहणार्थो ऽनुबध्यते। नः क्येति। न हि पठितानां मध्ये नकारान्तः
शब्दो ऽस्ति। कथं तर्हि विवक्षापि योगे ङाज्भवति। एतदेव वचनं ज्ञापकं। अच्वेरिति। अनुवर्त्ते
रतत्र तद्भावे क्यष् विज्ञायते। लोहित। नील। मंद्र। फेन। हरित। दास। मंद। कष्टाय क्रमणे॥१४॥ अनुवर्त्त
ते। न क्यष्। कष्टशब्दाच्चतुर्थीसमर्थात् क्रमणे ऽर्थे ऽनार्जवे क्यङ् प्रत्ययो भवति। कष्टाय कर्मणे क्रा
मति। कष्टायते। अत्यल्पमिदमुच्यते। सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यं। कण्वचिकी
र्षा। पापचिकीर्षा। तस्यामेतेभ्यः क्यङ् प्रत्ययो भवति। सत्त्रायते। कष्टायते। कक्षायते। गहनायते। कण्वचि
कीर्षायामिति किम्। अजः कष्टं क्रामति॥ कर्मणो रोमंथतपोभ्यां वर्त्तिचरोः॥१५॥ रोमंथशब्दात् तपःशब्दाच्च क
र्मणो यथाक्रमं वर्त्तिचरोरर्थयोः क्यङ् प्रत्ययो भवति। रोमंथं वर्त्तयति। रोमंथायते गौः॥ हनुचलन इति
वक्तव्यं। इह माभूत्। कीटो रोमंथं वर्त्तयति। तपसः परस्मैपदं च। तपश्चरति। तपस्यति। बाष्पोष्मभ्यां

...३०१६

१५
मुद्वमने। कर्मण इति वर्त्तते। बाष्पशब्दादूष्मशब्दाच्च कर्मण उद्वमने र्थे क्यङ् प्रत्ययो भवति। बाष्पमुद्वम
ति। बाष्पायते। ऊष्माणमुद्वमति। ऊष्मायते। फेनाच्चेति वक्तव्यं। फेनायते। शब्दवैरकलहाभ्रकण्
वमेघेभ्यः करणे। शब्द। वैर। कलह। अभ्र। कण्व। मेघ। इत्येतेभ्यः करणे करोत्यर्थे क्यङ् प्रत्ययो भवति
शब्दं करोति। शब्दायते। वैरायते। कलहायते। अभ्रायते। कण्वायते। मेघायते। सुदिनदुर्दिननी
हारेभ्यश्चेति वक्तव्यं। सुदिनायते। दुर्दिनायते। नीहारायते। अटा। अट्टा। शीका। कोटा। पोटा।
सोटा। प्रुष्टा। प्लुष्टा इत्येषां ग्रहणं। अटायते। अट्टायते। शीकायते। कोटायते। पोटायते। सोटा
यते। प्रुष्टायते। प्लुष्टायते। इष्टायते। सुखादिभ्यः कर्तृवेदनायां। कर्मग्रहणमनुवर्त्तते। सु
खइत्येवमादिभ्यः कर्मभ्यो वेदनायामर्थेऽनुभवेर्थे क्यङ् प्रत्ययो भवति। वेदयितुश्चेत्क
र्तुः संबंधीनि सुखादीनि भवंति। सुखं वेदयते। सुखायते। दुःखायते। कर्तृग्रहणं किम्। सु
खं वेदयते। प्रसाधको देवदत्तस्य। सुख। दुःख। तृप्र। कृछ्र। अस्र। अलीक। करुण॥ ४

कृपण। सोढ। इति सुखादिः। नमोवरिवश्चित्रङः क्यच्॥ १९॥ करण इति वर्त्तते। नमस्। वरिवस्। चित्रङ् इ
त्येतेभ्यः क्यच् प्रत्ययो भवति। करणविशेषे पूजादौ। नमसः पूजायां। नमस्यति देवान्। वरिवसः परि
चर्यायां। वरिवस्यति गुरून्। चित्रङ आश्चर्ये। चित्रीयते। ङकार आत्मनेपदार्थः॥ पुच्छभांडची
वराण्णिङ्॥ करण इति वर्त्तते। पुच्छभांडचीवरात् द्वर्त्तने परिधाने। उद्सनमुत्क्षेपणं। पर्यसनं परितः
क्षेपणं। संचीवरयते भिक्षुः। ङकार आत्मनेपदार्थः। णकारः सामान्यग्रहणार्थः। णेरनिटीति
मुंडमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृत ४। २ इत्येतेभ्यो णिङ् प्रत्ययो भवति। करणविशेषे
पुच्छादुद्सने पर्यसने वा। उत्पुच्छयते। परिपुच्छयते। भांडात्समाचराशीकरणे। संभांडयते।
४ तूस्तेभ्यो णिच्॥ २१॥ मुंड। मिश्र। श्लक्ष्ण। लवण। व्रत। वस्त्र। हलि। कलि। कृत। तूस्त। इत्येतेभ्यः क
रणे णिच् प्रत्ययो भवति। मुंडं करोति। मुंडयति। मिश्रयति। श्लक्ष्णयति। व्रतात् भोजने तन्निवृत्ति
वृत्तौ च। पयो व्रतयति। वृषलान्नं व्रतयति। वस्त्रात्समाच्छादने। संवस्त्रयति। हलिं गृह्णाति।

हलयति। कलिं गृह्णाति। कलयति। हलिकल्योरत्वनिपातनं सन्वद्भावप्रतिषेधार्थं। अजहलत्। अचकलत्
कृतं गृह्णाति। कृतयति। तूस्तानि विहन्ति। वितूस्तयति। केशान्विजटीकरोतीत्यर्थः। धातोरेकाचो हलादेः
क्रियासमभिहारे यङ्॥ एकाचो धातुः हलादिः क्रियासमभिहारे वर्तते। तस्माद्यङ् प्रत्ययो भवति
पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः। पुनः पुनः पचति। पापच्यते। पापठ्यते। भृशं ज्वलति। जाज्वल्य
ते। देदीप्यते। धातोरिति किं। सोपसर्गान्मा भूत्। निमन्त्रितः प्राटति भृशं। एकाच इति किं। भृशं जागर्त्ति॥
हलादेरिति किं। भृशमीक्षते। सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनां ग्रहणं यङ्विधाने कार्यं हलादित्वात्। सोसूच्य
ते॥ सोसूत्र्यते। मोमूत्र्यते। अटाट्यते। अरार्यते। अशाश्यते। प्रोर्णोनूयते। भृशं रोचते। भृशं शोभते
इत्यत्र न विधानान्नेष्यते॥ नित्यं कौटिल्ये गतौ॥ गत्यर्थवचनाद्धातोः कौटिल्ये गम्यमाने नित्यं य
ङ् प्रत्ययो भवति। कुटिलं क्रामति। चंक्रम्यते। दंद्रम्यते। नित्यग्रहणं विषयनियमार्थं। गतिवचना
न्नित्यं कौटिल्य एव यङ् स्यात्। न तु क्रियासमभिहारे। भृशं क्रामति॥ लुपसदचरजपजभदहदह ५

शगृभ्यो भावगर्ह्यायां॥ लुप। सद। चर। जप। जभ। दह। दश। गृ। इत्येतेभ्यो भावगर्ह्यायां धात्वर्थगर्ह्यायां ग
म्यमानायां यङ् प्रत्ययो भवति। गर्हितं लुम्पति। लोलुप्यते। एवं सासद्यते। चंचूर्यते। जंजप्यते। जंजभ्यते॥
दंदह्यते। दंदश्यते। निजेगिल्यते। भावगर्ह्यायामिति किं। साधु जपति। भावग्रहणं किं। साधनगर्ह्
यां मा भूत्। मंचं जपति वृषलः॥ नित्यग्रहणं विषयनियमार्थमनुवर्तते। एतेभ्यो नित्यं भावगर्ह्यायामेव भ
वति। न तु क्रियासमभिहारे। भृशं लुम्पति॥ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण
चुरादिभ्यो णिच्॥ ५५॥ सत्यादिभ्यश्चूर्णपर्यन्तेभ्यः चुरादिभ्यश्च णिच् प्रत्ययो भवति। सत्यमाचष्टे।
सत्यापयति। अर्थवेदसत्यानामापुग्वक्तव्यः॥ अर्थापयति। वेदापयति। आपुग्वचनसामर्थ्याट्टिलो
पो न भवति। पाशाद्विमोचने। विपाशयति। रूपाद्दर्शने। रूपयति। वीणयोपगायति। उपवीणयति॥
तूलेनानुकुष्णाति। अनुतूलयति। श्लोकैरुपस्तौति। उपश्लोकयति। सेनयाभियाति। अभिषेणय
ति। लोमान्यनुमार्ष्टि। अनुलोमयति। त्वचं गृह्णाति। त्वचयति। अकारान्तस्त्वचशब्दः। वर्मणा संनह्यति

अ०३पा०१
२४१

संवर्मयति। वर्णैरुल्लानि। वर्णयति। वर्णैरवध्वंसयति। अवचूर्णयति। चुरादिभ्यः स्वार्थे। चोरयति।
चिंतयति। स्वाभाविकत्वाद्दर्थाविधानस्य यथायथं प्रत्ययार्थो निर्दिश्यते। हेतुमति चे हेतुभूतंतत्र
स्य कर्तुः प्रयोजकः तद्व्यापारः प्रेषणाध्येषणादिलक्षणो हेतुमान्। तस्मिन्नभिधेये धातो
र्णिच्प्रत्ययो भवति। कटं कारयति। ओदनं पाचयति। तत्करोतीत्युपसंख्यानं। सूत्रयत्याद्यर्थं। सू
त्रं करोति। सूत्रयति। आख्यानात्कृतस्तदाचष्टे णिच्कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवत्कारं
भवति। आख्यानात्कृदंतात् णिच्वक्तव्यः तदाचष्ट इत्यस्मिन्नर्थे कृल्लुक् प्रकृतिप्रत्यापत्तिः
प्रकृतिवच्च कारकं भवति। कंसवधमाचष्टे। कंसं घातयति। बलिबंधमाचष्टे। बलिं बंधयति। राजाग
मनमाचष्टे। राजानमागमयति। आङ्लोपश्च कालात्यंतसंयोगे मर्यादायां। आरात्रिविवासमाचष्टे।
रात्रिं विवासयति। चित्रीकरणे प्रापि। उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं संभावय
ते। माहिष्मत्यां सूर्यमुद्गमयति। नक्षत्रयोगे ज्ञि। पुष्ययोगं जानाति। पुष्येण योजयति। मघाभिर्या ६

जयति। आख्यानाल्लुग्न भवति। नलोपाख्यानमाचष्टे। आख्यानमाचष्टे वाक्यमेव। दृष्ट्यर्थप्रांच प्र
वृत्तौ लुगादिर्भवति। मृगरमणमाचष्टे। मृगान् रमयति। रममाणान् मृगानन्यस्मै दर्शयन् कथय
ति। दृष्ट्यर्थ इत्येव। ग्रामे मृगरमणमाचष्टे। कंड्वादिभ्यो यक्॥ २१॥ कंड्व इत्येवमादिभ्यो यक्प्रत्य
यो भवति। द्विविधाः कंड्वादयः धातवः प्रातिपदिकानि च। तत्र धात्वधिकारात्। धातुभ्यः प्रत्ययो
विधीयते। न प्रातिपदिकेभ्यः। तथा च गुणप्रतिषेधार्थः ककारोनुबध्यते। धातुप्रकरणाद्धातुः
कस्य चासंजनादपि। आह चायमिमं दीर्घमन्ये धातुर्विभाषितः॥ कंडूञ्। कंडूयति। कंडू
यते। ञित्वात्कर्त्रभिप्राये क्रियाफल इत्यात्मनेपदं। कंडूञ्। मंडूञ्। मंतुञ्। वल्गुञ्। असूञ्।
हणीञ्। मणीञ्। महीङ्। ङकार आत्मनेपदार्थः। वेञ्। वेट्। तिरस्। इरस्। उरस्। इषुस्। म
गध। मेधा। तंतुस। मेघस। दुःख। सुख। चरण। चरम। संवर। भिषज्। भिष्णक्। इषुध। इषुर
गद्गद। गंगद। एला। केला। खेला। लिट्। लोट्। चरण। तुरण। उरण। धरण। कंड्वादिगणः॥

२४.३८१६

२८

गुपूधूपविछिपणिपनिभ्य आयः।गुपूरक्षणे।धूपसंतापे।विछगतौ।पणव्यवहारे स्तुतौ च।एभ्यः
इत्येतेभ्यः आयः प्रत्ययो भवति।स्वार्थे।गोपायति।धूपायति।विछायति।पणायति।पनायति।स्तु
त्यर्थेनैवपनिनासहच्चपतिन्तदर्थःपणिःप्रत्ययमुत्पादयति।नचव्यवहारार्थः।शतस्यपणते।सह
स्रस्यपणते।अनुबंधस्यकेवलेचरितार्थत्वान्नायप्रत्ययान्तादात्मनेपदंनभवति।ऋतेरीयङ्।ऋतिः
सौत्रोधातुः घृणायांवर्त्तते।अनुबंधस्यकेवलेचरितार्थत्वात्।ततईयङ्प्रत्ययोभवति।ङकारआ
त्मनेपदार्थः।ऋतीयते।घृणायांगतौचवर्त्तते।ऋतेः ऋच्छतीतिसिद्धं।ईयङ्चवचनंज्ञापनार्थंधातुविहि
तानांप्रत्ययानांअयनादयोनभवंतीति।कमेर्णिङ्।कमेर्धातोर्णिङ्प्रत्ययोभवति।णकारोवृ
द्ध्यर्थः।ङकारआत्मनेपदार्थः।कामयते।आयादयआर्द्धधातुकेवा।आर्द्धधातुकविषये आर्द्धधा
तुकविवक्षायामायादयोवाभवंति।गोप्ता।गोपिता।अर्तिता।ऋतीयिता।कमिता।कमयिता।नित्यप्र
त्ययप्रसंगेतदुत्पत्तिरार्द्धधातुकविषयेविकल्प्यते।नत्वप्रत्ययापेक्षमार्द्धधातुकप्रत्ययाभवे ७

ति।गुप्तिः।गोपाय॥ ॥सनाद्यंताधातवः॥ ३२॥सनआदिर्येषांतेसनादयः।सनादयोअंते
येषांतेसनाद्यंताः।समुदायाधातुसंज्ञाभवंति।प्रत्ययग्रहणपरिभाषेयं।पदसंज्ञायामंतवचने
नलिंगेनप्रतिनिषिद्धासा।तौपुनरिहांतशब्देनप्रतिप्रसूयते।चिकीर्षति।पुत्रीयति।पुत्रकाम्यति॥ ॥
स्यतासीॡलुटोः॥ ॡइतिरूपयुक्तस्यानुबंधमकमेवतस्मिन्लुटिचपरतःयथासंख्यंस्यतासीप्रत्य
यौभवतः।करिष्यति।अकरिष्यत्।श्वःकर्त्ता।इदित्करणमनुनासिकत्वोपपत्तिनिषेधार्थं।मंतास्मि
गंता।सिब्बहुलंलेटि॥ सिप्प्रत्ययोभवति।बहुलंलेटिपरतः।जोषिषत्।तारिषत्।मंदिषत्।नोदि
पत्।नचभवति।पताति विद्युत्।उदधिंच्यावयाति।कास्प्रत्ययादाममंत्रेलिटि॥ कासृशब्दकुत्सा
यां।ततःप्रत्ययांतेभ्यश्चधातुभ्यः आमप्रत्ययोभवति।लिटिपरतः।अमंत्रविषये।कासांचक्रे।प्रत्ययां
तेभ्यः लोलूयांचक्रे।अमंत्र इति किं।कृष्णोनोनाव।कास्यनेकाच इति कर्त्तव्यं।चुलुंपाद्यर्थं।च
कासांचकार।दरिद्रांचकार।चुलुम्पांचकार।आमोमित्त्वमदंतत्वाद्गुणत्वंविदेस्तथा।आका

सोरामविधानाच्चपररूपंकृतंनवतीति॥१॥ ॥इजादेश्चगुरुमतोऽनृच्छः।इजादिर्योधातुःगुरुमानृच्छत्यन्यः
तस्माच्चलिटिपरतःआम्प्रत्ययोभवति।ईहांचक्रे।ऊहांचक्रे।इजादेरितिकिम्।ततक्ष।गुरुमतइति
किम्।इयेष।उवोष।अनृच्छइतिकिम्।आनर्छ।आनर्छतुः।आनर्छुः।ऊर्णोतेःप्रतिषेधोवक्तव्यः।
प्रोर्णुनाव।अयवा।वाच्यऊर्णोर्णुवद्भावोयङ्प्रसिद्धिःप्रयोजनं।आमश्चप्रतिषेधार्थमेकाचश्चे
डुपग्रहणात्।२।दयायासश्च।दयदानगतिरक्षणेषु।अयगतौ।आसउपवेशने।इत्येतेभ्यो
लिटिपरतःआम्प्रत्ययोभवति।दयांचक्रे।पलायांचक्रे।आसांचक्रे।उषविदजागृभ्योऽन्यत
रस्यां।उषदाहे।विदज्ञाने।जागृनिद्राक्षये।एतेभ्योलिटिपरतोऽन्यतरस्यामाम्प्रत्ययोभवति।ओ
षांचकार।उवोष।विदांचकार।विवेद।जागरांचकार।जजागार।विदेरदन्तत्वप्रतिज्ञानादामिगुणो
नभवति।भीह्रीभृहुवांश्लुवच्च।ञिभीभये।ह्रीलज्जायां।डुभृञ्धारणपोषणयोः।हुदानादनयोः
इत्येतेभ्योधातुभ्योलिटिपरतोऽन्यतरस्यामाम्प्रत्ययोभवति।श्लाविवचास्मिन्कार्यम्भवति ८

किंपुनस्तत्कार्यं।द्विर्वचनं।बिभयांचकार।बिभाय।जिह्रयांचकार।जिह्राय।बिभरांचकार।बभा
र।जुहवांचकार।जुहाव।॥कृञ्चानुप्रयुज्यतेलिटि।आम्प्रत्ययस्यपश्चात्कृञनुप्रयुज्यते।लिटिपर
तः।कृञितिचप्रत्याहारेणभ्वस्त्योर्ग्रहणं।तत्सामर्थ्याच्चास्तेर्भूभावोनभवति।पाचयांचका
र।पाचयांबभूव।पाचयामास।विदांकुर्वन्त्वित्यन्यतरस्यां।विदांकुर्वन्त्वित्येतदन्यतरस्यांनिपा
त्यते।किंपुनरिहनिपात्यते।विदेर्लोटिआम्प्रत्ययोगुणाभावोलोटोलुक्।लोटश्चलोट्परस्यानुप्र
योगोनिपात्यते।अस्यपक्षेवेत्तुविदांकुर्वन्तु।अस्यपक्षेवेत्तुविदन्तु।इतिकरणःप्रदर्शनार्थः।नकेव
लंप्रथमपुरुषबहुवचनं।किंतर्हिसर्वाण्येवलोड्वचनान्यनुप्रयुज्यन्ते।विदांकरोतु।विदां
कुरुतात्।विदांकुरुतां।विदांकुर्वन्तु।विदांकुरु।विदांकुरुतमिति।अभ्युत्सादयांप्रजनयांचि
कयांरमयामकःपावयांक्रियाद्विदामक्रन्नितिच्छन्दसि।अभ्युत्सादयामकइत्येवमादयश्छन्दसि
विषयेऽन्यतरस्यांनिपात्यन्ते।सदिजनिरमीणांसंप्रतानांलुङिआम्प्रत्ययोनिपात्यते।चिनोतेर

प्यत्रैवाम्प्रत्ययो द्विर्वचनं। ऊत्त्वं च। अकरिति चतुर्णामपि प्रत्येकमनुप्रयोगः। विदामक्रन्निति विदेर्लुङि
आम् निपात्यते। गुणाभावश्च। अक्रन्निति चास्यानुप्रयोगः। अभ्युत्सादयामकः। अभ्युदसीष
दिति भाषायां। प्रजनयामकः। प्राजीजनदिति भाषायां॥ चिकयामकः। अचैषीदिति भाषायां।
रमयामकः। अरीरमदिति भाषायां॥ पावयांक्रियात्। पाव्यादिति भाषायां। विदामक्रन्। अवे
दिषुरिति भाषायां॥ च्लि लुङि॥४३॥ च्लिप्रत्ययो भवति धातोर्लुङि परतः। इकार उच्चारणार्थः। चका
रः स्वरार्थः। च्लेः सिजादिनादेशान् वक्ष्यति। तत्रैवोदाहरिष्यामः। च्लेः सिच्॥४४॥ च्लेः सिजादेशो भ
वति। इकार उच्चारणार्थः। अकार्षीत्। अहार्षीत्। आगमानुदात्तत्वं हि प्रत्ययस्वरमिव चित्स्वर
मपि बाधते इति। स्थानिन्यादेशे चेच्च हि श्चकारोऽनुबन्धने। स्पृश। मृश। कृष। तृप। दृपः सिच्॥ अ
स्पृक्षत्। अस्प्राक्षीत्। अस्पार्क्षीत्। मृश। अमृक्षत्। अम्राक्षीत्। अमार्क्षीत्। कृष। अकृक्षत्। अ
क्राक्षीत्। अकार्क्षीत्। तृप। अतृपत्। अत्राप्सीत्। अतार्प्सीत्। दृप। अदृपत्। अद्राप्सीत्। अदार्प्सीत्। ६

शल इगुपधादनिटः क्सः॥४५॥ शलन्तो यो धातुरिगुपधस्तस्मात्परस्य च्लेरनिटः क्स आदेशो
भवति। दुह। अधुक्षत्। लिह। अलिक्षत्। शल इति किं। अभैत्सीत्। इगुपधादिति किम्। अधा
क्षीत्। अनिट इति किम्। अकोषीत्॥ श्लिष आलिङ्गने॥४६॥ श्लिषधातोरालिङ्गनार्थे आलिङ्गनक्रिया
यां परस्य च्लेः क्सादेशो भवति। आलिङ्गनमुपगूहनं परिष्वङ्गः॥ तत्र नियमार्थमिदं। अश्लिक्षत्
कन्यां देवदत्तः॥ आलिङ्गन इति किम्। समाश्लिषत् जतु च काष्ठं च॥ न दृशः॥४७॥ दृशेः क्सादेशः प्रा
प्तः प्रतिषिध्यते। दृशो दृशेः परस्य च्लेः क्सादेशो न भवति। तस्मिन्प्रतिषिद्धे इरितो वेति अङ्सि
चौ भवतः। अदर्शत्। अद्राक्षीत्॥ णिश्रिद्रुस्रुभ्यः कर्तरि चङ्॥४८॥ सिजपवादश्चङ् विधीयते। ण्यं
तेभ्यो धातुभ्यः श्रिद्रुस्रुभ्यश्च परस्य च्लेः कर्तृवाचिनि लुङि परतश्चङादेशो भवति। ङकारो
गुणवृद्धिप्रतिषेधार्थः। चकारो विशेषणार्थः। अचीकरत्। अजीहरत्। अशिश्रियत्। अदुद्रु
वत्। असुस्रुवत्। कर्तरीति किम्। अकारयिषातां कटौ देवदत्तेन॥ कमेरुपसंख्यानं। आपादय

आर्द्धधातुकेतिपक्षेणिङ्नास्ति।तदेतदुपसंख्यानं।अचकमत।णिङ्पक्षेसन्वद्भावः।अचीकमत।नाक
मिष्टसुखंयांतिसुयुक्तैर्वडवारथैः।अथपक्वाणिणेयान्तिथेःचाकमतनोणिङः॥विभाषाधेट्श्व्योः॥४९॥
धेट्पाने।टुओश्विगतिवृद्ध्योः।एताभ्यामुत्तरस्यच्लेर्विभाषाचङादेशोभवति।धेटस्तावत्।अदधत्।सि
च्यर्हेविभाषाघ्राधेट्इतिलुक्।अधात्।अधासीत्।श्वयतेःखल्वपि।अशिश्वियत्।अङेप्यत्रविकल्प
इष्यते।अश्वत्।अश्वयीत्।कर्त्तरीत्येव।अधिषातांगावौवत्सेन॥गुपेश्छन्दसि॥गुपेःपरस्यच्लेश्छन्दसिवि
षयेविभाषाचङादेशोभवति।यत्रापप्रसयोनाक्षि।नत्रापेविधिः।इमान्नोमित्रावरुणौगृहानजु
गुपतं।अगौप्तं।अगोपिष्टं।अगोपायिष्टमितिवा।भाषायांतुचङ्वर्जयित्वाशिष्टंरूपत्रयंभवति।
नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः॥५१॥ऊनपरिहाणे।ध्वनशब्दे।इलप्रेरणे।अर्दगतौयाचनेच॥
एतेभ्योधातुभ्यःपरस्यच्लेश्चङादेशःप्राप्तःप्रतिषिध्यते।छन्दसिविषये।काममूनयीत्।औनिनदिति
भाषायां।माचत्वाग्निर्ध्वनयीत्।अदिध्वनदितिभाषायां।काममैलयीत्।ऐलिलदितिभाषायां।काममर्दयीत् १०

आर्दिददितिभाषायां।अस्यतिवक्तिख्यातिभ्योऽङ्॥५२॥असुक्षेपणे।वचपरिभाषणे।ख्यायादेशोवा
ख्याप्रकथने।चक्षिङादेशोवा।इत्येतेभ्यःपरस्यच्लेरङादेशोभवति।कर्त्तृवाचिनिलुङिपरतः।अ
स्यतेः।पुषादिपाठादेवाङिसिद्धेपुनर्ग्रहणमात्मनेपदार्थम्।पर्यास्थत।पर्यास्थेताम्।पर्यास्थन।व
क्तेः।अवोचत्।अवोचतां।अवोचन्।ख्याति।आख्यत्।आख्यतां।आख्यन्।कर्त्तरीतिकिम्।पर्या
सिषातांगावौवत्सेन॥लिपिसिचिह्वश्च॥५३॥लिपउपदेहे।षिचक्षरणे।ह्वेञ्स्पर्द्धायां।एतेभ्यश्चपरस्य
च्लेरङादेशोभवति।अलिपत्।असिचत्।आह्वत्।चग्योगउत्तरार्थः॥आत्मनेपदेष्वन्यतरस्यां॥५४॥
पूर्वेणनित्येप्राप्तेविभाषेयमारभ्यते।लिपिसिचिह्वःआत्मनेपदेषुपरतःच्लेरङादेशोभवति।अन्यतर
स्यां।स्वरितञितइत्यात्मनेपदम्।अलिप्त।अलिपत।असिचत।असिक्त।आह्वत।आह्वास्त॥
पुषादिद्युताद्य्लृदितःपरस्मैपदेषु॥पुषादिभ्योद्युतादिभ्यश्चलृदिद्भ्यश्चधातुभ्यःपरस्यच्लेःपरस्मै
पदेषुपरतोऽङादेशोभवति।पुषादिर्दिवाद्यंतर्गणोगृह्यतेनतुभ्वादिक्र्यादिषुयान्तर्गणः।पुष।

अग्लुचत्। ग्लुञ्चु। अग्लुचत्। घुनादि। अघुनत्। अघ्विनत्। घुड्षी। लृदितिपरस्मैपदे। लृदिद्भ्यः। गम्लृ। अग
मत्। शक्लृ। अशकत्। परस्मैपदेष्विति किम्। व्यद्योतिष्ट। अलोठिष्ट। सर्त्तिशास्त्यर्त्तिभ्यश्च। सृगतौ। शा
सु अनुशिष्टौ। ऋगतौ। इत्येतेभ्यः परस्य च्लेरङादेशो भवति। सर्त्ति। असरत्। शास्ति। अशिषत्। अ
र्त्ति। आरत्। पृथक्करणमात्मनेपदार्थं। समारत। चकारः परस्मैपदेष्वित्यस्यानुकर्षणार्थः। नञ्चो
त्तरत्रोपयोगं याह्यति। यङ्लुगन्तानामप्यङ् भवति। सर्त्त्यादीनां। आसरत्। असरीसरत्। अशाशि
षत्। इरितो वा। इरितो धातोः परस्य च्लेर्वा अङादेशो भवति। भिदिर्। अभिदत्। अभैत्सीत्। छिदि
र्। अछिदत्। अछैत्सीत्। परस्मैपदेष्वित्येव। अभित्त। अछित्त। जृस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्वि
भ्यश्च। विनिवर्त्तते। जृष् वयोहानौ। स्तम्भुः सौत्रो धातुः। म्रुचु म्लुचु गत्यर्थौ। म्रुचु ग्लुचु स्तेयकरणे
ग्लुंचु षंज गतौ। टुओश्वि गतिवृद्ध्योः। एतेभ्यो धातुभ्यः परस्य च्लेर्वा अङादेशो भवति। अजरत्। अ
जारीत्। अस्तभत्। अस्तंभीत्। अम्रुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। अग्रुचत्। अग्रोचीत्। ११

अग्लुचत्। अग्लोचीत्। अग्लुचत्। अग्लुंचीत्। अश्वत्। अश्वायत्। अशिश्वियत्। ग्लुचुग्लुंचोरेकत
रयादानेपि रूपत्रयं सिद्ध्यति। अर्थभेदात्तु द्वयोरुपादानं उक्तं केश्चित्तु वर्ण्यते। द्वयोरुपादान
सामर्थ्यात्। ग्लुंचेरनुनासिकलोपो न भवति। अग्लुंचदिति। कृमृदृरुहिभ्यश्छंदसि। कृमृदृरुहि
भ्य एतेभ्यः परस्य च्लेश्छंदसि विषये वाङादेशो भवति। शकलांगुष्ठकोकरत्। म। अयामरत्। दृ। अ
दरदर्थानि। पर्वतानां रुहत्। अंतरिक्षा। द्विमानमारुहत्। छंदसीति किम्। अकार्षीत्। अमृत। अ
दारीत्। अरुक्षत्। चिण् ते पदः। पद गतौ। अस्माद्धातोः परस्य च्लेश्चिणादेशो भवति। तशब्दे परतः।
स्फायी ओप्यायी वृद्धौ। एतेभ्यः परस्य च्लेस्तशब्दे परतो न्यतरस्यां चिणादेशो भवति। सामर्थ्यादा
त्मनेपदैकवचनं गृह्यते। उदपादि सस्यम्। समपादि भैक्ष्यं। तदिति किम्। उदपत्सातां। उदपत्स
त। दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्यामिति निवर्त्तते। दीपी दीप्तौ। जनी प्रादुर्भावे।
बुध अवगमने। पूरी आप्यायने। तायृ संतानपालनयोः। स्फायी ओप्यायी वृद्धौ। एतेभ्यः परस्य

अ॰ ३ पा॰ १

१४७

ञ्रेत्ते परतोऽन्यतरस्यां च्विणादेशो भवति। अदायि। अदायिष्ट। अमंनि। अमंनिष्ट। अबोधि। अबु
द्ध। अपूरि। अपूरिष्ट। अतापि। अतापिष्ट। अप्यायि। अप्यायिष्ट। अचः कर्मकर्तरि ॥ अजंताद्धातोः
परस्य च्लेः कर्मकर्तरि शब्दे परतश्चिणादेशो भवति। अन्यतरस्यां प्राप्तविभाषेयम्। अकारि कटः स्व
यमेव। अलावि केदारः स्वयमेव। अवलिष्ट केदारः स्वयमेव। अच इति किम्। अभेदि काष्ठं स्वयमेव
कर्मकर्तरीति किम्। अकारि कटो देवदत्तेन। दुहश्च ॥ दुह प्रपूरणे। अस्मात् परस्य च्लेः कर्मकर्तरि तङ्
परतश्चिणादेशो भवत्यन्यतरस्यां। अदोहि गौः स्वयमेव। अदुग्ध गौः स्वयमेव। कर्मकर्तरीत्येव
अदोहि गौर्गोपालकेन। न रुधः ॥ रुधिर आवरणे। अस्माद्धातोः परस्य च्लेः कर्मकर्तरि चिणादेशो
न भवति। अन्ववारुद्ध गौः स्वयमेव। कर्मकर्तरीत्येव। अन्ववारोधि गौः गोपालकेन। तपोनुतापे च ८५
नेति वर्त्तते। तप संतापे इत्यस्माद्धातोः परस्य च्लेश्चिणादेशो न भवति। कर्मकर्तर्यनुतापे च। अनुता
पः पश्चात्तापः। तस्य ग्रहणम् अकर्मकर्त्रर्थं। तत्र हि भावकर्मणोरपि प्रतिषेधो भवति। अन्वतप्त तपस्त्वा १२

पसः। अन्वतापि। अन्ववातप्त पापेन कर्मणा। चिण् भावकर्मणोः ॥ धातोः परस्य च्लेश्चिणादेशो भव
ति। तशब्दे परतो भावकर्मणि रथयोः। भावे। नावनं। शायि। भवता। कर्मणि खल्वपि। अकारि कटो
देवदत्तेन। अहारि भारो देवदत्तेन। विस्पष्टार्थं। सार्वधातुके यक् ॥ भावकर्मवाचिनि सा
र्वधातुके परतो यक् प्रत्ययो भवति। भावे। आस्यते भवता। शय्यते भवता। कर्मणि। पच्यते भव
ता ओदनः। गम्यते ग्रामः। ककारो गुणवृद्धिप्रतिषेधार्थः। यग्विधाने कर्मकर्तर्युपसंख्यानं। वि
प्रतिषेधाद्धि शपो बलीयस्त्वं। पच्यते ओदनः स्वयमेव। कर्तरि शप् ॥ कर्तृवाचिनि सार्वधातुके परतः
शप् प्रत्ययो भवति। पकारः स्वरार्थः। शकारः सार्वधातुकार्थः। भवति। पचति। नयति। दिवादिभ्यः
श्यन् ॥ दिव इत्येवमादिभ्यः श्यन् प्रत्ययो भवति। शपोऽपवादः। नकारः स्वरार्थः। शकारः सार्वधातु
कार्थः। दीव्यति। सीव्यति। वा भ्राश भ्लाश भ्रमु क्रमु क्लमु त्रसि त्रुटि लषः ॥ टु भ्राशृ भ्लाशृ दीप्तौ
भ्रमु अनवस्थाने। चमु चलने। द्वयोरपि ग्रहणं। क्रमु पादविक्षेपे। क्लमु ग्लानौ। त्रसी उद्वेगे॥

त्रुटछेदने। लषकांतौ। एतेभ्यो धातुभ्यो वा श्यन्प्रत्ययो भवति। भ्राशते। भ्राश्यते। भ्रमते। भ्राम्यते। भ्र
मति। भ्राम्यति। क्रामति। क्राम्यति। क्लामति। क्लाम्यति। त्रसति। त्रस्यति। त्रुटति। त्रुट्यति। लषति।
लष्यति। यसोऽनुपसर्गात्॥ यसु प्रयत्ने। दैवादिकस्तस्मान्नित्यं श्यनि प्राप्ते अनुपसर्गाद्विकल्प उच्य
ते। यसोऽनुपसर्गाद्धातोः श्यन्प्रत्ययो भवति। यस्यति। अनुपसर्गादिति किम्। आयस्यति। प्रयस्य
ति। संयसश्च॥ संपूर्वोपसर्गार्थः। आरंभः। संपूर्वाद्यसो वा श्यन्प्रत्ययो भवति। अनुपसर्गादिति कि
म्। संयसति। संयस्यति। स्वादिभ्यः श्नुः॥ षुञ् अभिषवे। इत्येवमादिभ्यो धातुभ्यः श्नुप्रत्ययो भवति
शपोऽपवादः। सुनोति। चिनोति। श्रुवः शृ च॥ श्रु श्रवणे। श्रुवः श्नुप्रत्ययो भवति। तत्संनियोगेन च शृ आदेशो भव
ति। शृणोति। शृणुतः। शृण्वंति। भ्वादिकपाठात्। शपि भवति श्रवति। अक्षोऽन्यतरस्याम्॥ १५॥ अक्षू व्या १६ तनूकर
प्तौ। भ्वादिकस्तस्मादन्यतरस्यां श्नुप्रत्ययो भवति। अनेकार्थत्वाद्धातूनां विशेषणोपादानं णे तक्षः॥
तक्ष्णोति काष्ठं। तक्षति काष्ठं। तनूकरण इति किम्। संतक्षति। वाग्भिः॥ १७॥ तुदादिभ्यः शः॥ १३

तुद व्यथने। इत्येवमादिभ्यो धातुभ्यः शप्रत्ययो भवति। शपोऽपवादः। शकारः सार्वधातुकार्थः।
तुदति। ॥ रुधादिभ्यः श्नम्॥ १८॥ रुधिर् आवरणे। इत्येवमादिभ्यो धातुभ्यः श्नम्प्रत्ययो भव
ति। शपोऽपवादः। मकारो देशविध्यर्थः। शकारस्त्वाचलोप इति विशेषणार्थः। रुणद्धि। रुंद्धः। रुंधन्ति॥
१८ तनादिकृञ्भ्य उः॥ तनु विस्तारे इति। एवमादिभ्यो धातुभ्यः कृञश्च उप्रत्ययो भवति। शपोऽपवा
दः। तनोति। तनुतः। तन्वंति। कृञः खल्वपि। करोति तनादिपाठादेव सिद्धे प्रत्यये पुनः करोते रुपादानं नि
यमार्थं। अन्यथान्ये नादिष्कार्यमाप्नुयात्। तनादिभ्यस्तथासोरिति विभाषा सिचो लुग् भवति। अतत।
अतनिष्ट। धिन्विकृण्व्योरच्च॥ इवि हिवि धिवि जिवि पिवि प्रीणनार्थाः। कृवि हिंसाकरणयोश्च। धिन्वि
कृण्व्योर्द्वयोः उप्रत्ययो भवति। अकारश्चान्तादेशः। धिनोति। कृणोति। अतोलोपस्य स्थानिव
द्भावाद्गुणो न भवति। क्र्यादिभ्यः श्ना॥ ॥ डुक्रीञ् द्रव्यविनिमये। इत्येवमादिभ्यो धातुभ्यः श्नाप्र
त्ययो भवति। शपोऽपवादः। शकारः सार्वधातुकार्थः। क्रीणाति। प्रीणाति। स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्

स्तुभः। आद्यास्चत्वारो धातवः सौत्राः। स्कुञ् आप्रवणे क्र्यादिः। एतेभ्यो धातुभ्यः श्नःश्नुप्रत्ययो भवति। स्तुभ्ना।
स्तभ्ना। स्तभ्नाति। स्तभ्नोति। स्कभ्नाति। स्कभ्नोति। स्कभ्नाति। स्कभ्नोति। स्कुभ्नाति। स्कुभ्नोति। स्कुनोति। उ
दित्वप्रतिज्ञानात्सौत्राणां धातूनां सर्वार्थत्वं विज्ञायते। नेनद्विकरणविषयित्वमेवैषां स्यात्। हलः श्नः शानज्झौ
॥ हलउत्तरस्य श्नाप्रत्ययस्य शानजादेशो भवति हौ परतः। स्तुभाण। मुषाण। बधान वत्सं। हल इति
किम्। क्रीणीहि। प्रीणीहि। हाविति किम्। मुष्णाति। श्न इति स्थानिनिर्देशः आदेशसंप्रत्ययार्थः इतर
था हि प्रत्ययान्तरमेव सर्वविषयं विज्ञायेत। छंदसि शायजपि। छंदसि विषये श्नः शायजप्यादेशो भवति
शानजपि हौ परे। गृभाय जिह्वया मधु। शानच् खल्वपि। बधान वत्सं। व्यत्ययो बहुलं॥ ८५॥ यथायथं वि
करणाः शबादयो विहिताः तेषां छंदसि विषये। बहुलं व्यत्ययो भवति। व्यतिगमनं व्यत्ययः। व्यतिकरो वि
षयान्तरे विधानं। क्वचित् द्विविकरणता। क्वचित् त्रिविकरणता। आंडक्षिरूस्य नेदंति। भिनत्ती ति प्रा
प्ते। मरवन मरति। नाम्रियते इति प्राप्ते। द्विविकरणता वा। इंद्रो वस्तेनेषतु। नयतीति प्राप्ते। त्रिविक १४

रणता च। इंद्रेण युजा तरुषेम वृत्रं। तरेम इति प्राप्ते। बहुलग्रहणं सर्वविधिव्यभिचारार्थं। सुप्तिङुपग्र
ह लिंगनराणां कालहलच्स्वरकर्तृयङां च। व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन
८६ लिङ्याशिष्यङ्॥ आशिषो लिङि तस्मिन्परतः छंदसि विषये अङ् प्रत्ययो भवति। शपोपवादः। छंदस्य
नपधे ति लिङः सार्वधातुकसंज्ञोऽप्यस्ति इति। स्था। गा। गमि। वचि। विदि। शकि। रुह। यः प्रयोजनं। स्था।
उपस्थेयं वृषभं। गा। सत्यमुपगेयं। गमि। गमेम यजमानतो गृहान्। वचि। मंत्रं वोचेमाग्नये। विदि। विदे
यमेनां। मनसि प्रविष्टां। शकि। व्रतं चरिष्यामि तच्छकेयं। रुहि। स्वर्गलोकमारुहेयं। हशोरङ्कृच्छः
पितरं च दृशेयं मातरं च। कर्मवत्कर्मणा तुल्यक्रियः॥ कर्मणि क्रिया कर्म। कर्मस्थया क्रियया तुल्यक्रि
यः कर्त्ता कर्मवद्भवति। यस्मिन्कर्मणि कर्तृत्वेऽपि तद्वत्क्रिया लक्ष्यते यथा कर्मणि कर्त्ता कर्मवद्भव
ति। कर्मस्थया क्रियया णिकाया णिप्रनिपद्यते। कर्त्तरि शबिति कर्तृग्रहणमिहानुवर्त्तते प्रथमया विपरिणम्य
ते। यगात्मनेपदचिण्चिण्वद्भावाः प्रयोजनं। भिद्यते काष्ठं स्वयमेव। अभेदि काष्ठं स्वयमेव। कारिष्य

तेकरः स्वयमेव। नन्करणं स्वाश्रयमपि यथा स्यात्। सिध्यते कुसूलेनेति। अकर्मकत्वं नावलकारः सिद्धो भवति
लिङश्च। शिघ्यङिति ङ्लिकारको निर्दिश्यते। तत्र लानुदत्तेनैतस्य कर्त्ता कर्मवद्भवति। कुसूलात्। द्वितीया
न भवति। कर्मणेति किम्। करणाधिकरणाभ्यां तुल्यक्रियस्य माभूत्। साधुरसिः छिनत्ति। साधु स्थाली
पचति। सा त्वधिकारस्समाने धातौ कर्मवद्भावः इह न भवति। पचत्योदनं देवदत्तः। राध्यत्योदन
स्वयमेव। कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्त्ता कर्मवद्भवति। न कर्तृस्थभावकानां नापि कर्तृ
स्थक्रियाणां। कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया। आसासिभावः कर्तृस्थः कर्तृस्था च गमेः
क्रिया। ९१ तपस्तपःकर्मकस्यैव। तपसंतापे। इत्येतस्य कर्त्ता कर्मवद्भवति। स च तपःकर्मकस्यैव। नान्य
कर्मकस्य क्रियाभेदात्। विध्यर्थमिदम्॥ उपवासादीनि तपांसि तापसं तपन्ति। दुःखयन्तीत्यर्थः। स ताप
सः स्वर्गस्थितः स्वर्गाय तपस्तप्यते। अर्जयतीत्यर्थः। पूर्वेण [illegible] कर्मवद्भावो विधीयते। तप्यते
तपस्तापसः। अतप्त तपस्तापसः। तपःकर्मकस्यैवेति किम्। उत्तपति सुवर्णं सुवर्णकारः। उत्तप्यमा १५

८८ ह

नं सुवर्णं सुवर्णकारं वितपति। न दुहस्नुनमां यक्चिणौ। दुहस्नु। नमां इत्येतेषां धातूनां कर्मकर्त्तरि य
क्चिणौ कर्मवद्भावादतिदिष्टौ न भवतः। दुहेरनेन यक् प्रतिषिध्यते। चिण् दुहश्चेति सर्वमेव विभाषितः
दुग्धे गौः स्वयमेव। अदुग्ध गौः स्वयमेव। अदोहि वा। प्रस्नुते गौः स्वयमेव। प्रास्नोष्ट गौः स्वयमेव। न
मते दण्डः स्वयमेव। अनंस्त दण्डः स्वयमेव। यक्चिणोः प्रतिषेधे णिश्रिग्रंथिग्रंथिब्रूञात्मनेपदाकर्मकाणा
मुपसंख्यानं। कारयति कटं देवदत्तः। कारयते कटः स्वयमेव। अचीकरत कटः स्वयमेव। अचीकरत्कटं दे
वदत्तः। उत्पुच्छयते गौः स्वयमेव। उदपुपुच्छत गौः स्वयमेव। अग्रंथिष्ट मेखला स्वयमेव। श्रथ्नाति ग्रंथं देव
दत्तः। श्रथ्नीते ग्रंथः स्वयमेव। अश्रंथिष्ट ग्रंथः स्वयमेव। श्रथ्नाति मेखलां देवदत्तः। श्रथ्नीते मेखला स्व
यमेव। अश्रंथिष्ट मेखला स्वयमेव। ब्रूते कथां देवदत्तः। ब्रूते कथा स्वयमेव। अवोचत कथा स्वयमेव।
आत्मनेपदविधाने अकर्मकाणां। हन्ति माणवकं देवदत्तः। आहते माणवकः स्वयमेव। आवधिष्ट मा
णवकः स्वयमेव। आहतेति वा। विकुर्वते सैंधवाः स्वयमेव। व्यकृषत सैंधवाः स्वयमेव। कुषिरंजोः प्रा

२३-४४५।

अनुपादृ
१५२

चांश्यन्यपरस्मैपदंच।कृषिनिःकर्षे।रंजरागे।अनयोर्धात्वोःकर्मकर्त्तरिप्राचामाचार्याणांमतेनश्यन
प्रत्ययो नवति।परस्मैपदंचायमात्मनेपदस्यापवादः।कृष्यतिपादः स्वयमेव।रज्यतिवस्त्रंस्वयमेव॥
प्राग्ग्रहणंविकल्पार्थं।कृष्यते।रज्यते।व्यवस्थितविभाषाचेयं।तेनलिङ्।लिङोःस्यादिविषयेचनभ
विष्यतः।चुकुषेपादः स्वयमेव।कोषिषीष्ट।रंक्षीष्ट।कोषिष्यते।रंक्ष्यते।अकोषि।अरंजिवस्त्रंस्वय
मेव।धातोः॥८९॥धातोरित्यधिकारः।यदित ऊर्ध्वमनुक्रमिष्यामः आ तृतीयाध्यायपरिसमाप्तेः
धातोरित्येवंतद्वेदितव्यं।वक्ष्यति।तव्यत्तव्यानीयरः।कर्त्तव्यं।करणीयं।धातुग्रहणमनर्थकं।पङ्
षिधोधात्वनधिकारात्तदुपपदसंज्ञार्थंतु द्वितीयेधातुग्रहणे।अस्मिन्धात्वधिकारेनेयथास्या
त्।सर्वत्रमात्रनाम्नीति।आर्द्धधातुकसंज्ञार्थंच द्वितीयंधातुग्रहणंकर्त्तव्यं।धातोरित्येवंविहितस्य
यथास्यादिहमाभूत्।लूस्यां।लूनिरिति।तत्रोपपदंसप्तमीस्थं।तत्रैवस्मिन्नतृतीयधात्वधिकारे
यत्सप्तमीनिर्दिष्टंतदुपपदसंज्ञंभवति।वक्ष्यति।कर्मण्यण्।कुंभकारोनगरकारः।स्थग्रहणंस्व १६

सूत्रे सप्तमी निर्देशप्रतिपत्त्यर्थं।इतरथा ह्यत्रसप्तमीश्रूयते।तत्रैवस्मात् स्तंबेरमः।कर्णेजपतिय
त्रवासप्तमीश्रुतिरस्तिसप्तम्यांजनेर्डइतिस्थग्रहणात्सर्वत्रभवति।गुरुसंज्ञाकरणं अन्वर्थसं
ज्ञाविज्ञानेयतिसमर्थापरिभाषाव्यापारार्थं।पश्यकुंभंकरोतिकटमितिप्रत्ययोनभवति।उप
पदप्रदेशाः उपपदमितिङ्।इत्येवमादयः॥९२॥कृदतिङ्।अस्मिन्धात्वधिकारेतिङ्वर्जितःप्र
त्ययः कृत्संज्ञो भवति।कर्त्तव्यं।करणीयं।अतिङितिकिं।चीयात् स्तुयात्।कृत्प्रदेशाः।कृत्तद्धि
तसमासाश्चेत्येवमादयः॥९३॥वासरूपोस्त्रियां।अस्मिन्धात्वधिकारे असरूपोपवा
दप्रत्ययो वाबाधकोभवति।स्त्र्यधिकारेविहितंप्रत्ययंवर्जयित्वा।ण्वुल्तृचौ उत्सर्गौ॥इगु
पधज्ञाप्रीकिरःकइत्यपवादस्तद्विषये ण्वुल्तृचावपि भवतः।विक्षेपकः।विक्षेप्ता।विक्षिपः।अ
सरूप इतिकिं।कर्मण्यण्।इत्युत्सर्गः।आतोनुपसर्गेकइत्यपवादःसनित्यंबाधकोभवति।
गोदः।कंबलदः।~~असरूपोवाबाधकोभवति।स्त्र्यधिकारविहितं~~ नानुबंधमसारूप्यम्।अ
स्त्रियामितिकिं।स्त्रियाक्तिन्निति उत्सर्गः।अप्रत्ययादित्यपवादः।सबाधक एवभवति

अ॰ २ पाद॰ १

११२ चिकीर्षा:।जिहीर्षा:।८५ कृत्याः प्राङ्ण्वुलः।ण्वुल्तृचाविति कल्पति।प्रागेतस्मात् ण्वुलसंबंधना

त् यदित ऊर्ध्वमनुक्रमिष्यामः।कृत्यसंज्ञास्ते वेदितव्याः।तत्रैवोदाहरिष्यामः।कृत्यप्रदेशाः कृत्यैरधिका

र्थवचने।कृत्यानां कर्त्तरि वेत्येवमादयः।८६ तव्यत्तव्यानीयरः।धातोरिति वर्त्तते।धातोस्त

व्यत्तव्यानीयर् इत्येते प्रत्यया भवंति।तकाररेफौ स्वरार्थौ कर्त्तव्यं करणीयं।कर्त्तव्यं।वसेस्तव्य

त् कर्त्तरि णिच्च।वास्तव्यः।केलिमर उपसंख्यानं।पचेलिमा माषाः।भिदेलिमानि काष्ठानि

।कर्मकर्त्तरि चायमिष्यते।।८७ अचो यत्।अजंताद्धातोर्यत्प्रत्ययो भवति।तकारो यतो

नावइति स्वरार्थः।गेयं।वेयं।नेयं।जेयं।अजग्रहणं किं।यावता हलंतात्।ण्यतं वक्ष्यति

तदजंतं भूतपूर्वादपि यथा स्यात्।दित्स्यं।धित्स्यं।तकिशसिचतियतिजनीनामुपसंख्यानं।

तकि।तक्यं।शसि।शस्यं।यति।यत्यं।चति।चत्यं।जनि।जन्यं।हनो वा वधः।वध्यः।घात्यः।।८९

पोरदुपधात्।पवर्गांताद्धातोरकारोपधाद्यत्प्रत्ययो भवति।ण्यतोऽपवादः।शप्।शप्यं।लभ।लभ्यं। १२

पोरिति किम्।पाक्यं।वाक्यं।अदुपधादिति किम्।कोप्यं।गोप्यं।नपरकरणं तत्कालावधारणा

र्थं।आप्यं।संकिसहोश्च।शकि।सहि।इत्येतयोर्धात्वोर्यत्प्रत्ययो भवति।शकि।शक्यं।सह्यं।।

गदमदचरयमश्चानुपसर्गे।गद।मद।चर।यम।इत्येतेभ्योऽनुपसर्गेभ्यो यत्प्रत्ययो भवति।गद्यं

मद्यं।चर्यं।यम्यं।अनुपसर्ग इति किम्।प्रगाद्यं।प्रमाद्यं।यमेः स्वरेणैव सिद्धे नियमार्थं वचनं।चरेरा

ङि चागुरौ।आचार्योपदेशः।अगुराविति किं।आचार्यउपनेता।अवद्यपण्यवर्या गर्ह्यपणि

तव्यानिरोधेषु।अवद्य।पण्य।वर्या।इत्येते शब्दा निपात्यंते।गर्ह्यपणितव्यानिरोधेष्वर्थेषु

यथासंख्यं।अवद्यमिति निपात्यते।गर्ह्यं चेद्भवति।अवद्यं पापं।अनूद्यमन्यत्।वदसुपिक्य

प्।पण्यमिति निपात्यते।पणितव्यं चेद्भवति।पण्यः कंबलः।पण्या गौः।पाण्यमन्यत्।वर्ये

ति स्त्रियां निपात्यते।अनिरोधश्चेद्भवति।अप्रतिबंधः।शतेन वर्य्या।वर्त्या।अन्या स्त्रीलिं

गनिर्देशः।किमर्थः।वार्या ऋत्विजः।वह्यं करणं।वह्यमिति वहे धातोः करणे कारके य

त्स्मयोर्निपात्यते।वहंसनेनेतिवह्यंशकटं।करणमितिकिं।वाह्यमन्यत्॥ अर्यःस्वामिवैश्ययोः॥ ऋगतावित्येतस्मा
द्धातोर्ण्यति प्राप्ते स्वामिवैश्ययोरभिधेययोर्यत्प्रत्ययो निपात्यते। अर्यः स्वामी। अर्यो वैश्यः। वणोनाव इत्याद्युदा
त्वं प्राप्तं स्वामिन्यंतोदात्तत्वं च वक्तव्यं। स्वामिवैश्ययोरिति किं। आर्यो ब्राह्मणः॥ उपसर्या काल्या प्रजने॥ उप
सर्येति निपात्यते। काल्या चेत्प्रजने न भवति। उपपूर्वात्सर्तेर्यत्प्रत्ययः। प्राप्तकाला काल्या। प्रजनं प्रथमं गर्भ
ग्रहणं। गर्भग्रहणे प्राप्तकाला उपसर्या गौः॥ उपसर्या वडवा काल्या। प्रजन इति किं। उपसार्या शरदि मथुरा
५ अजर्यं संगतं॥ अजर्यमिति निपात्यते। संगतं चेद्भवति। जीर्यतेर्धातोर्नञ्पूर्वात्संगते संगमने कर्त्तरि यत्प्र
त्ययो निपात्यते। न जीर्यतीत्यजर्यं। अजर्यमार्यसंगतं। अजर्यं नोस्तु संगतं। संगतमिति किं। अजरिता कंब
लः॥ वदः सुपि क्यप् च॥ अनुपसर्ग इति वर्त्तते। वदेर्धातोः सुबंत उपपदे अनुपसर्गे क्यप्प्रत्ययो भवति। चकारा
द्यच्च। ब्रह्मोद्यं। ब्रह्मवद्यं। सत्योद्यं। सत्यवद्यं। सुपीति किं। वाद्यं। अनुपसर्ग इत्येव। प्रवाद्यं॥ भुवो भावे॥
अनुपसर्ग इत्येतस्माद्धातोः सुबंत उपपदे अनुपसर्गे भावे क्यप्प्रत्ययो भवति। यच्च नानुवर्त्तते। ब्रह्मभूयं गतः १८

ब्रह्मत्वं। देवभूयं। देवत्वं। भावग्रहणमुत्तरार्थं। सुपीत्येव। भव्यं॥ अनुपसर्ग इत्येव। प्रभव्यं॥ हनस्त च॥ ८
सुप्यनुपसर्ग इति अनुवर्त्तते। भाव इति च। हंतेर्धातोः सुबंत उपपदे अनुपसर्गे भावे क्यप्प्रत्ययो भ
वति। नकारस्य च तकारादेशः। ब्रह्महत्या। अश्वहत्या। सुपीत्येव। घातो वर्त्तते। एषच नुभावेन भवत्यभिधाना
त्। अनुपसर्ग इत्येव। प्रघातो वर्त्तते॥ एतिस्तुशास्वृदृजुषः क्यप्॥ सुप्यनुपसर्गे भाव इति निवृत्तं। सा
मान्येन विधानं। एति। स्तु। शासु। वृ। दृ। जुष। इत्येतेभ्यः क्यप्प्रत्ययो भवति। इत्यः। स्तुत्यः। शिष्यः। वृत्यः।
आदृत्यः। जुष्यः। क्यपि वर्त्तमाने पुनः क्यब्ग्रहणं बाधकबाधनार्थं। ओरावश्यक इति। ण्यतं बाधित्वा
क्यबेव भवति। अवश्यस्तुत्यः। वृग्रहणे वृञो ग्रहणमिष्यते। न वृङः। वार्या ऋत्विजः। शासिगुहिदुहि
भ्यो वेति वक्तव्यं। शास्यं। शिष्यं। गुह्यं। गोह्यं। दुह्यं। दोह्यं। आङ्पूर्वादंचेः संज्ञायामुपसंख्यानं। आज्यम
कृष्यमुपेयं। इण्स्तावित्यस्य एतद्रूपं नेण्ग्रहणं॥ ऋदुपधाच्चाक्लृपिचृतेः॥ ऋदुपधाद्धातोः क्यप्प्रत्ययो भव
ति। क्लृपिचृती वर्जयित्वा। वृत। वृत्यं। वृध। वृध्यं। अक्लृपिचृतेरिति किं। कल्प्यं। चर्त्यं। नकारग्रहणं

कि॰। ऋतुकृन्तंराह्वने। ण्यदेव भवति। कीर्त्यं। पा॰। मृजेर्ण्यद्धकः। पाणिसर्ग्या रज्जुः। समवसर्ग्या च। समवसर्ग्या॥
ई च खनः॥ खनेर्धातोः क्यप् प्रत्ययो भवति ईकारश्चान्तादेशः। खेयं। दीर्घनिर्देशः प्रश्लेषार्थः। तत्र द्वितीय इका
रो ये विभाषेत्यात्वबाधनार्थः॥ भृञोऽसंज्ञायां॥ भृञो धातोरसंज्ञायां क्यप् प्रत्ययो भवति। भृत्याः कर्मकराः
भर्त्तव्या इत्यर्थः। असंज्ञायामिति किम्। भार्या नाम क्षत्रियाः। संभृतवृत्ति भार्या। संभृत्याः। संभार्याः। संज्ञाया
पुंसि हस्वत्वात् अत्रे भार्या प्रसिध्यति। स्त्रियां तु बाधिकारेणैतेन भार्या प्रसिध्यति॥ मृजेर्विभाषा॥ मृजेर्धा
तोर्विभाषा क्यप् प्रत्ययो भवति। ऋदुपधत्वात् प्राप्तविभाषेयं। परिमृज्यः। परिमार्ग्यः॥ राजसूयसूर्यमृ
षोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः॥ राजसूयः। सूर्यः। मृषोद्यं। रुच्यः। कुप्यं। कृष्टपच्याः। अव्यथ्याः। इत्येते क्य
प् निपात्यते। राजशब्दे उपपदे सुनोतेः सूतेर्वा क्यप् निपात्यते दीर्घश्च। राज्ञा सोतव्यो राजा वा इह सू
यते राजसूयः क्रतुः। सर्तेः सुवतेर्वा क्यप्। सर्तेरुत्वं सुवतेर्वा रुडागमः। सुवति। सरति। वा। सूर्यः। मृषा पूर्वाद्व
देः पक्षे प्यन्ति प्राप्ते नित्यं क्यप् निपात्यते। मृषोद्यं। रोचते। रुच्यः। गुपेरादेः कत्वं च संज्ञायां। कुप्यं। गोप्य १५

मन्यत्। कृष्टे पच्यन्ते। कृष्टपच्याः। कर्मकर्त्तरि निपातनं। रोचते। रुच्यते। न व्यथते। अव्यथ्यः। कर्त्तरि।
१५ भिद्योद्ध्यौ नदे॥ भिदेरुज्झेश्च कर्त्तरि क्यप् निपात्यते। नदे अभिधेये। उज्झेर्धत्वं। भिनत्ति कूलमि
ति भिद्यः। उज्झत्युदकमिति उद्ध्यः। नद इति किं। भेत्ता। उज्झिता॥ पुष्यसिद्ध्यौ नक्षत्रे॥ पुषेः सिधेश्च
अधिकरणे क्यप् निपात्यते। नक्षत्रेऽभिधेये। पुष्यन्त्यस्मिन्नर्थाः इति पुष्यः। सिध्यन्त्यस्मिन्निति सिध्यः।
नक्षत्र इति किम्। पोषणं। सेधनं॥ विपूयविनीयजित्या मुञ्जकल्कहलिषु॥ विपूय। विनीय। जित्य इत्ये
ते शब्दा निपात्यन्ते यथासंख्यं मुञ्जकल्कहलिषु वाच्येषु। विपूर्वाभ्यां पवतेर्नयतेश्च तथा जयतेर्यति
प्राप्ते कर्मणि क्यप् निपात्यते। विपूयो मुञ्जः। विपव्यमन्यत्। विनीयः कल्कः। विनेयमन्यत्। जित्यो ह
लिः। जेयमन्यत्॥ प्रत्यपिभ्यां ग्रहेश्छन्दसि॥ प्रति अपि इत्येवं पूर्वाद्ग्रहेः छन्दसि विषये क्यप् प्रत्य
यो भवति। मत्तस्य न प्रतिगृह्यं। तस्मान्नापिगृह्यं। छन्दसीति किम्। प्रतिग्राह्यं। अपिग्राह्यं॥ पदास्वैरि
बाह्यापक्ष्येषु च॥ पदे अस्वैरिणि बाह्यायां पक्षे च ग्रहेर्धातोः क्यप् प्रत्ययो भवति। पदेना

वत।अगृह्यंपदंयस्यमन्त्रेयस्यसंज्ञाविहिता।अवगृह्यंपदं।यस्यावग्रहःक्रियते।अस्वैरिपरतंत्र।
गृह्यकाइमेगृहीतकाइत्यर्थः।बाह्यायांग्रामगृह्या।नगरगृह्यासेना।ग्रामनगराभ्यांबहिर्भूतेत्य
र्थः।स्त्रीलिंगनिर्देशादन्यत्रन।मुवृत्तिः।पक्षेभवःपक्ष्यः।दिगादित्वाद्यत्।वासुदेवगृह्याः।अर्जुनगृह्याः।
तत्पक्षाश्रिताइत्यर्थः।विभाषाकृवृषोः।कृत्यं।वृषस्वविनापावाक्यपंप्रसंयो।नावति।करोतेर्पे
निमाणेवर्षणेऽदुपधत्वान्नित्येक्यपिप्राप्तेविकल्पआरभ्यते।कृत्यं।कार्यं।वृष्यं।वर्ष्यं।युग्यंचपत्रे। २१
युग्यमितिनिपात्यते।पत्रंवाहनं।पतत्यनेनेतिपत्रंवाहनं।युग्योऽश्वः।युग्योहस्ती।युजेःक्यप्कुत्वं
चनिपात्यते।पत्रइतिकिं।योग्यमन्यत्।अमावस्यदन्यतरस्यां।अमाशब्दःसहार्थेवर्त्तते।तस्मिन्नु
पपदेवसेर्धातोःकालेऽधिकरणेण्यत्प्रत्ययोभवति।तत्रान्यतरस्यांवृद्ध्यभावोनिपात्यते।सहवसतो
ऽस्मिन्कालेसूर्याचन्द्रमसावमावस्या।अमावास्या।एकदेशविकृतस्यानन्यत्वात्।अमावास्यायावेत्यत्र।
अमावस्याशब्दस्यापिग्रहणंभवति।अमावसोरहंण्यतोर्निपातयाम्यवृद्धितां।तथैकवृत्तिनातयोः २०

नयतेराङ्पूर्वात्ण्यदायादेशौनिपात्येते।अनित्येवाच्ये।आनाय्योदक्षिणाग्निः।रूढिरेषा।तस्मा
दनित्यविशेषेदक्षिणाग्नावेवावतिष्ठते।तस्यचानित्यत्वंनित्यमजागरणात्।यस्माद्गार्हपत्यादानीयते।द
क्षिणाग्निराहवनीयेनसहैकयोनिस्तत्रैवतस्मिन्निपातनं।नदक्षिणाग्निमात्रे।तस्यहियोनिर्विक
ल्प्यते।वैश्यकुलाद्वित्तवतोभ्राष्ट्राद्वागार्हपत्याद्वेति।।आनाय्योनित्यइतिचेद्दक्षिणाग्नौकृतंनवे
न।एकयोनौतुतंविद्याद्धानेयोऽन्यथाभवेत्।।प्रणाय्योऽसंमतौ।।अविद्यमानासंमतिरस्मिन्नि
त्यसंमतिः।संमननंसंमतिःप्रज्ञा।प्रणाय्यइतिनिपात्यते।असंमतावभिधेये।प्रणाय्यश्चौरः।असंमता
विनिश्चितःप्रणेयोऽन्यः।यद्येवंकथमेतत्।ज्येष्ठायपुत्रायपिताब्रह्मप्रब्रूयात्।प्रणाय्यायांतेवासिने
नान्यस्मैकस्मैचनेति।संमतिरभिलाषोप्युच्यते।तदभावेननिष्कामतया।संमतिरंतेवासी।भव
ति।तस्मैनिष्कामायमोक्षार्थंयतमानायांतेवासिनेप्रणाय्यायब्रह्मप्रब्रूयादितिप्रयुज्यते।।पाय्यसांनाय्य
नि निकाय्यधाय्यामानहविर्निवाससामिधेनीषु।।२८।।पाय्य।सांनाय्य।निकाय्य।धाय्य।।इत्येते

अ॰३पाद१

१५५

व[illegible]शब्दा निपात्यंते। यथासंख्यं। माने हविषि निवासे सामिधेन्यां चाभिधेयायां। पाय्य इति माङो ण्यत्प्र
त्ययः। आदेः पत्वं च निपात्यते। मानं। पाय्यं। मानं। मेयमन्यत्। संपूर्वान्नयतेर्ण्यत् आयादेशो दनवनः। उ
१५७ पसर्गदीर्घत्वं च निपात्यते। सान्नाय्यं हविः। संनेयमन्यत्। हविर्विशेषे वर्तते। निपूर्वाच्चि
नोतेर्ण्यत् आयादेशः आदिकत्वं च निपात्यते। निवासो निकाय्यः। निचेयमन्यत्। धाञो ण्यत् आयादेशो निपा
त्यते। सामिधेनी चेद्भवति। धाय्या सामिधेनी। धेयमन्यत्। सामिधेनीशब्दः ऋग्विशेषस्य वाचकः। न तु धा
य्येति न सर्वा सामिधेन्युच्यते। किं तर्हि। काचिदेव। ... तथा चाग्निमिधेन्यामपि प्रयुज्यते। धा
य्याः शंसति। अग्निर्नेता त्वं सोम क्रतुभिरिति॥३०॥ क्रतौ कुंडपाय्यसंचाय्यौ॥ [illegible]॥ कुंडपाय्य सं
चाय्य इत्येतौ शब्दौ निपात्येते। क्रतावभिधेये। कुंडशब्दे तृतीयान्ते उपपदे पिबतेर्धातोरधिक
रणे यत्प्रत्ययो निपात्यते। युक् च। कुंडैः पीयते ऽस्मिन्सोम इति कुंडपाय्यः क्रतुः। यतो नाव इति स्व
रः। संपूर्वाच्चिनोतेर्ण्यत् आयादेशो निपात्यते। संचीयते ऽसौ संचाय्यः क्रतुः। क्रतावित्ति किम्। कुं २२

शु॰ष्ट

३१

डपानं। संचेयः॥ अग्नौ परिचाय्योपचाय्यसमूह्याः॥ ॥ परिचाय्य उपचाय्य समूह्य इत्येते शब्दा नि
पात्यंते। अग्नावभिधेये। परिपूर्वादुपपूर्वाच्च चिनोतेर्ण्यत् आयादेशो निपात्यते। परिचाय्योऽग्निः। उपचाय्यः। समिपूर्वाद्व
हतेः संप्रसारणं दीर्घत्वं च निपात्यते। समूह्यं चिन्वीत पशुकामः। अग्नाविति किम्। परिचेयः। उपचेयः।
संवाह्यः। चित्याग्निचित्ये च। चित्यशब्दो ऽग्निचित्यशब्दश्च निपात्यते। चीयते ऽसौ चित्यो ऽग्निः। अग्निचय
नमेवाग्निचित्या। भावे यकारप्रत्ययः तुक् च निपात्यते। तेनान्तोदात्तत्वं भवति। अग्नावित्येव। चेय
मन्यत्॥ ण्वुल्तृचौ॥३२॥ धातोरित्यनुवर्त्तते। सर्वधातुभ्यः ण्वुल्तृचौ प्रत्ययौ भवतः। कारकः कर्त्ता।
हारकः हर्त्ता। वकारः सामान्यग्रहणार्थः। अवुञ्छंदसि। नु रिहमेयस्विति॥ नंदिग्रहिपचादिभ्यो ल्यु
णिन्यचः॥३४॥ प्रत्येकं मादिशब्दः संबध्यते। त्रिभ्यो गणेभ्यस्त्रयः प्रत्यया यथासंख्यं स्युरिति। नंदा
दिभ्यो ल्युः। ग्रहादिभ्यो णिनिः। पचादिभ्योऽच्। नंदिग्रहिपचादयश्च न धातुपाठसंनिविष्टा गृह्यन्ते। किं
तर्हि। नंदनः रमणः इत्येवमादिषु प्रातिपदिकगणे ऽपोद्धृत्य प्रकृतयो निर्दिश्यन्ते। नंदिवाशि

अ॰३पा॰[illegible]

महर्षिसाधिवर्द्धिज्ञोनिरिचि-भ्यो एवं नेभ्यः संज्ञायां।नंदनः।वासनः।मदनः।दूषणः।साधनः।वर्द्धनः।शो
भनः।रोचनः।सहितपदमेः संज्ञायां।सहनः।तपनः।मदनः।जल्पनः।रमणः।दर्पणः।नर्दनः।संक्रंदनः
संकर्षणः।संघर्षणः।जनार्दनः।पवनः।मधुसूदनः।विभीषणः।लवणः।निपातनात् [illegible] विभविना
शनः।कुलदमनः।शत्रुदमनः।इतिनंद्यादिः॥ ॥ग्रह।उत्सह।उद्दास।उद्भास।स्था।मंत्र।सं
मर्द।रक्ष।श्रु।वस।वप।शंनो।निरक्ष।निश्रावी।निवासी।निवापी।निशायी।याच।व्याह [illegible] संव्या
हृ।व्रज।वद।वसांप्रतिसिद्धानां।अयाची।अव्याहारी।असंव्याहारी।अव्राजी।अव्राजी [illegible]
अयामी।अचामविनकर्तृकाणां प्रातिषिद्धानामित्येव।अकारी।अहारी।अनायी।विषयी
विषयी।देशे।अभिभावीकते।अभिभावी।अपराधी।अवरोधी।परिभावी।परिभवी।इतिग्रहा
दिग्रहणं।पच।वच।वप।वद।वल।पत।नदट्।भषट्।प्लवट्।चरट्।गरट्।तरट्।च [illegible]
वर।मर।क्षम।सूदट्।देवट्।हेव।सेव।मेष।कोप।मेव।नर्त।क्षणं।दर्श।सर्प।राज [illegible] केम्। २३

३४

श्वपच।पचादिराकृतिगणः॥ ॥इगुपधज्ञाप्रीकिरः कः॥३५॥ इगुपधेभ्यो धातुभ्यो ज्ञानातेः प्रीणा
तेः किरतेश्च कप्रत्ययो भवति।विक्षिपः।विलिखः।बुधः।कृशः।जानाति।ज्ञः।प्रीणाति।प्रियः॥
किरति।किरः।देव।सेव।मेषादयः।पचादिषु द्रष्टव्याः॥ ॥आतश्चोपसर्गे॥३६॥आकारांतेभ्यो
धातुभ्यः उपसर्ग उपपदे कप्रत्ययो भवति।णप्रत्ययापवादः।प्रस्थः।सुग्लः।सुम्लः॥पाघ्राध्माधे
ट्दृशः शः॥ पा।घ्रा।ध्मा।धेट्।दृश।इत्येतेभ्यो धातुभ्यः शप्रत्ययो भवति।पा।उत्पिबः।पिबः।
घ्रा।उज्जिघ्रः।विजिघ्रः।ध्मा।उद्धमो।विधमः।धेट्।उद्धयो।विधयः।दृश।उत्पश्यो।विपश्यः।उपस
र्ग इति केचिदनुवर्तयंति।पश्यः।जिघ्रः।जिघ्रतेः संज्ञायां प्रतिषेधः।व्याघ्रः॥ [illegible] अनुपसर्गाल्लिं
पविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च॥३७॥ अनुपसर्गेभ्यो लिंपादिभ्यो धातुभ्यः
शः प्रत्ययो भवति।लिंपति।लिंपः।विंदति।विंदः।धारयति।धारयः।पारयति।पारयः।वेद
यति।वेदयः।उद्धेजयति।उद्धेजयः।चेतयति।चेतयः।सातिः सौत्रो धातुः।सातयः।साहयः।

अनुपसर्गादितिकिम्॥ प्रलिपः॥ नौलिंपेरितिवक्तव्यं॥ निलिंपा देवाः॥ गवादिषु विंदेः संज्ञायां॥ गोविंदः॥ अरविं
दः॥ ददातिदधात्योर्विभाषा॥ ३॥ ददातेर्दधातेश्च विभाषा णप्रत्ययो भवति॥ श्यापवादः॥ ददः॥ दायः॥ दधः॥
धायः॥ अनुपसर्गादित्येव॥ प्रदः॥ प्रधः॥ ज्वलितिकसंतेभ्यो णः॥ ४९॥ इतिशब्द आद्यर्थे॥ ज्वल दीप्तौ॥ इत्ये
वमादिभ्यो धातुभ्यः कसगतावित्येवमंतेभ्यो विभाषा णप्रत्ययो भवति॥ अचोपवादः॥ ज्वलः॥ ज्वालः॥
चलः॥ चालः॥ अनुपसर्गादित्येव॥ प्रज्वलः॥ तनोतेरुपसंख्यानं॥ अवतनोति॥ अवतानः॥ श्याद्व्यधास्रु
संस्रुतीणवसावहृलिहश्लिषश्वसश्च॥ ५०॥ अनुपसर्गादिति निवृत्तं॥ विभाषेति च॥ श्यैङ्॥ आका
रांतेभ्यो धातुभ्यः॥ व्यध॥ आस्रु॥ संस्रु॥ अतीण्॥ अवसा॥ अवहृ॥ लिह॥ श्लिष॥ श्वस॥ इत्येतेभ्यश्च धा
तुभ्यो णप्रत्ययो भवति॥ श्यैङः॥ श्यायः॥ आकारांतत्वादेव श्यायतेर्णप्रत्यये सिद्धे वचनं बाधकबाधना
र्थम्॥ उपसर्गे कं बाधित्वा अयमेव भवति॥ अवश्यायः॥ प्रतिश्यायः॥ आ॥ दायो धायः॥ व्यधः॥ व्याधः॥
आस्रावः॥ संस्रावः॥ अत्यायः॥ अवसायः॥ अवहारः॥ लेहः॥ श्लेषः॥ श्वासः॥ ५१॥ दुन्योरनुपसर्गे॥ ॥ २६

दुनोतेर्नयतेश्चानुपसर्गाण्णप्रत्ययो भवति॥ दुनोतीति दावः॥ नयतीति नायः॥ अनुपसर्गादिति किम्॥ प्र
दवः॥ प्रणयः॥ ॥ विभाषाग्रहः॥ ५२॥ ग्रहेर्धातोर्विभाषा णप्रत्ययो भवति॥ अचोपवादः॥ ग्राहः॥ ग्र
हः॥ व्यवस्थितविभाषेयं॥ जलचरे ग्राह एव भवति॥ ज्योतिषि ग्रह एव॥ भवतेश्चेति वक्तव्यं॥ भवः॥ भावः॥
गेहे कः॥ ५३॥ ग्रहेर्धातोः कप्रत्ययो भवति॥ गेहे कर्त्तरि॥ गेहं वेश्म॥ तात्स्थ्यात् दाराश्च गृह्णातीति गृ
हाः दाराः॥ गृहं वेश्म॥ शिल्पिनि ष्वुन्॥ ५४॥ धातोः ष्वुन्प्रत्ययो भवति॥ शिल्पिनि कर्त्तरि॥ नृतिखनिरं
जिभ्यः परिगणनं॥ नर्त्तकः॥ खनकः॥ रजकः॥ नर्त्तकी॥ खनकी॥ रजकी॥ रंजेरनुनासिकलोपश्च॥ ५५॥
गस्थकन्॥ गायतेस्थकन्प्रत्ययो भवति॥ शिल्पिनि कर्त्तरि॥ गाथकः॥ ण्युट्॥ चकारेण ग इत्यनुकृष्य
ते॥ ण्युट् प्रत्ययो भवति॥ गायतेः॥ शिल्पिनि कर्त्तरि॥ गायनः॥ गायनी॥ योगविभाग उत्तरार्थः॥ ॥
हश्च व्रीहिकालयोः॥ चकारेण ण्युट् अनुकृष्यते॥ जहातेर्जिहीतेश्च ण्युट् प्रत्ययो भवति॥ व्रीहौ
कर्त्तरि॥ काले वा॥ हायना नाम व्रीहयो भवंति॥ जहत्युदकमिति कृत्वा॥ काले हायनो नाम संव

अ॰ ३ पाद १
२६०

स्वरः।जहातिना वानिति।जिहीतेवा॥ ॥युसुरलूवः समभिहारेवुन्॥४८॥ युङ् गतौ। स्नातौ। लूञ् छेदने।
इत्येतेभ्योधातुभ्यः समभिहारेवुन्प्रत्ययोभवति। प्रवकः। सरकः। लवकः। समभिहारग्रहणेनात्रसा
धुकारित्वंलक्ष्यते। साधुकारिणिवुन्विधानं। नतुदापिपः सुष्टुकरोतितत्रभवति। बहुशोपिपोदु
ष्टंकरोति। नतत्रनभवति॥ ॥आशिषिचवुन्॥ ॥आशिषिगम्यमानायांधातुमात्राद्वुन्प्रत्ययोभ
वति। जीवतात्। जीवकः। नंदतात्। नंदकः। आशीः प्रार्थनाविशेषः। साचेह क्रियाविषया। मनुष्याः
क्रियायाःकर्त्तारंनिवध्नाति। इत्येवमाशंसते॥१५०॥ इतिवामनकाशिकायांवृत्तौतृतीयाध्यायस्यप्र
थमःपादःसमाप्तः। ॥श्री॥ ॥संवत् १७४४ वर्षेफा॰ चैत्रशुद्ध १० सोमवासरेलेखः॥ ॥

२५